प्राधान्यात् शस्त्रकर्म्मैव तावत् पूर्व्वमुपदेक्ष्यामस्तत्सम्भारांश्च । तच्च शस्त्रकर्म्माष्टविधम् । तद्यथा । छेद्यं भेद्यं लेख्यं वेध्यमेष्यमाहार्य्यं विस्राव्यं सीव्यमिति ॥ * ॥ अतोऽन्यतमं कर्म्म चिकीर्षता वैद्येन पूर्व्वमेवोपकल्पयितव्यानि । तद्यथा । यन्त्रशस्त्रक्षाराग्निशलाकाशृङ्गतुम्बजलौकालाबूजाम्बवौष्ठपिचुप्रोतसूत्रपत्रपट्टमधुघृतवसापयस्तैलतर्पणकाषायालेपनकल्कव्यजनशीतोष्णोदककटाहादीनि परिकर्म्मिणश्च स्निग्धाः स्थिरा बलवन्तः । ततः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु दध्यक्षतान्नपानरत्नैरग्निं विप्रान् भिषजश्चार्च्चयित्वा कृतबलिमङ्गलस्वस्तिवाचनं लघु भुक्तवन्तं प्राङ्मुखमातुरमुपवेश्य यन्त्रयित्वा प्रत्यङ्मुखो वैद्यो मर्म्मशिरास्नायुसन्ध्यस्थिधमनीः परिहरन्ननुलोमं शस्त्रं निदध्यादापूयदर्शनात् सकृदेवापहरेच्छस्त्रमाशु च । महत्स्वपि च पाकेषु द्व्यङ्गुलं त्र्यङ्गुलं वा शस्त्रपदमुक्तम् । तत्रायतो विशालः समः सुविभक्त इति व्रणगुणाः । भवतश्चात्र ।

"आयतश्च विशालश्च सुविभक्तो निराश्रयः ।
प्राप्तकालकृतश्चापि व्रणः कर्म्मणि शस्यते ॥
शौर्य्यमाशु क्रिया शस्त्रतैक्ष्ण्यमस्वेदवेपथू ।
असंमोहश्च वैद्यस्य शस्त्रकर्म्मणि शस्यते ॥"

एकेन वा व्रणेनाशुध्यमानेनान्तरावुद्धावेक्ष्य अपरान् व्रणान् कुर्य्यात् । भवन्ति चात्र ।

"यतो यतो गतिं विद्यादुत्सङ्गो यत्र यत्र च ।
तत्र तत्र व्रणं कुर्य्याद्यथा दोषो न तिष्ठति ॥"

तत्र भ्रूगण्डशङ्खललाटाक्षिपुटौष्ठदन्तवेष्टककक्षाकुक्षिवङ्क्षणेषु तिर्य्यक्छेद उक्तः ॥

"चन्द्रमण्डलवच्छेदान् पाणिपादेषु कारयेत् ।
अर्द्धचन्द्राकृतींश्चापि गुदे मेढ्रे च बुद्धिमान् ॥"

अन्यथा तु शिरास्नायुच्छेदनादतिमात्रं वेदना चिराद्व्रणसंरोहो मांसकन्दी प्रादुर्भावश्चेति । मूढगर्भोदराशोऽश्मरीभगन्दरमुखरोगेष्वभुक्तवतः कर्म्म कुर्वीत । ततः शस्त्रमवतार्य्य शीताभिरद्भिरातुरमाश्वास्य समन्तात् परिपीड्याङ्गुल्या व्रणमभिमृज्य प्रक्षाल्य कषायेण प्लोतेनोदकमादाय तिलकल्कमधुसर्पिःप्रगाढ़ामौषधयुक्तां वर्त्तिं प्रणिदध्यात् । ततः कल्केनाच्छाद्य नातिस्निग्धां नातिरूक्षां नातिघनां कवलिकां दत्त्वा वस्त्रपट्टेन बध्नीयाद्वेदनारक्षोघ्नैर्धूपैर्धूपयेद्रक्षाघ्नैश्च मन्त्रै रक्षां कुर्वीत । ततो गुग्गुल्वगुरुसर्ज्जरसवचागौरसर्षपचूर्णैर्लवणनिम्बपत्रव्यामिश्रैराज्ययुक्तैर्धूपैर्धूपयेत् । आज्यशेषेण चास्य प्राणान् समालभेत ऽउदकुम्भाच्चापो गृहीत्वा प्रोक्षयन् रक्षाकर्म्म कुर्य्यात्तद्वक्ष्यामः ॥ * ॥

"कृत्यानां प्रतिघातार्थं तथा रक्षोभयस्य च ।
रक्षाकर्म्म करिष्यामि ब्रह्मा तदनुमन्यताम् ॥
नागाः पिशाचा गन्धर्वाः पितरो यक्षराक्षसाः ।
अभिद्रवन्ति ये ये त्वां ब्रह्माद्या घ्नन्तु तान् सदा ॥
पृथिव्यामन्तरीक्षे च ये चरन्ति निशाचराः ।
दिक्षु वास्तुनिवासाश्च पान्तु त्वां ते नमस्कृताः ।
पान्तु त्वां मुनयो ब्राह्म्या दिव्या राजर्षयस्तथा ।
पर्व्वताश्चैव नद्यश्च सर्व्वाः सर्व्वेऽपि सागराः ॥
अग्नी रक्षतु ते जिह्वां प्राणान् वायुस्तथैव च ।
सोमो व्यानमपानं ते पर्य्यन्यः परिरक्षतु ॥
उदानं विद्युतः पान्तु समानं स्तनयित्नवः ।
बलमिन्द्रो बलपतिर्मनुर्मन्ये मतिं तथा ॥
कामांस्ते पान्तु गन्धर्व्वाः सत्त्वमिन्द्रोऽभिरक्षतु ।
प्रज्ञां ते वरुणो राजा समुद्रो नाभिमण्डलम् ॥
चक्षुः सूर्य्यो दिशः श्रोत्रे चन्द्रमाः पातु ते मनः ।
नक्षत्राणि सदा रूपं छायां पान्तु निशास्तव ॥
रेतस्त्वाप्याययन्त्वापो रोमाण्योषधयस्तथा ।
आकाशं खानि ते पातु देहं तव वसुन्धरा ॥
वैश्वानरः शिरः पातु विष्णुस्तव पराक्रमम् ।
पौरुषं पुरुषश्रेष्ठो ब्रह्मात्मानं ध्रुवो भ्रुवौ ॥
एता देहे विशेषेण तव नित्या हि देवताः ।
एतास्त्वां सततं पान्तु दीर्घमायुरवाप्नुहि ॥
स्वस्ति ते भगवान् ब्रह्मा स्वस्ति देवाश्च कुर्व्वताम् ।
स्वस्ति ते चन्द्रसूर्य्यौ च स्वस्ति नारदपर्व्वतौ ॥
स्वस्त्यग्निश्चैव वायुश्च स्वस्ति देवाः सहेन्द्रगाः ।
पितामहकृता रक्षा स्वस्त्यायुर्वर्द्धतां तव ।
ईतयस्ते प्रशाम्यन्तु सदा भव गतव्यथः ॥"

इति स्वाहा ॥

"तैर्व्वेदात्मकैर्मन्त्रैः कृत्या व्याधिविनाशनैः ।
मयैवं कृतरक्षस्त्वं दीर्घमायुरवाप्नुहि ॥" * ॥

ततः कृतरक्षमातुरमागारं प्रवेश्याचारिकमादिशेत् । ततस्तृतीयेऽहनि विमुच्यैवं बध्नीयाद्वस्त्रपट्टेन । न चैनं त्वरमाणोऽपरेद्युर्मोचयेत् । द्वितीयदिवसे परिमोक्षणाद्विग्रथितो व्रणश्चिरादुपसंरोहति तीव्ररुजश्च भवति । अत ऊर्द्धं दोषकालबलादीनवेक्ष्य कषायालेपनबन्धाहाराचारान् विदध्यात् । न चैनं त्वरमाणः सान्तर्दोषं रोपयेत् स ह्यल्पेनाप्यपचारेणाभ्यन्तरमुत्सङ्गं कृत्वा भूयोऽपि विकरोति । भवन्ति चात्र ।

"तस्मादन्तर्बहिश्चैव सुशुद्धं रोपयेद्व्रणम् ।
रूढ़ेऽप्यजीर्णव्यायामव्यवायादीन् विवर्जयेत् ॥
हर्षं क्रोधं भयञ्चापि यावदास्थैर्य्यसम्भवात् ।
मासान् षट् सप्त वा नूनं विधिरेषः प्रशस्यते ॥
हेमन्ते शिशिरे चैव वसन्ते चापि मोक्षयेत् ।
त्र्यहात् त्र्यहाच्छरद्ग्रीष्मवर्षास्वपि च बुद्धिमान् ॥
अतिपातेषु रोगेषु नेच्छेद्विधिमिमं भिषक् ।
प्रदीप्तागारवच्छीघ्रं तत्र कुर्य्यात् प्रतिक्रियाम् ॥
या वेदना शस्त्रनिपातजाता
तीव्रा शरीरं प्रदुनोति जन्तोः ।
घृतेन सा शान्तिमुपैति सिक्ता
कोष्णेन यष्टीमधुकान्वितेन ॥"

इति सुश्रुते ५ अध्यायः ॥

शस्त्रः, पुं, (शसत्यनेनेति । शस वधे + "असिचिमिदिशसिभ्यः क्तः ।" उणा० ४।१६३। इति क्तः। युद्धा, दाम्नीशयुयुजेति ।" ३ । २ । १८२ । इति ष्ट्रन् ।) खड्गः । यथा,—

"रिष्टिः खड्गस्तरवारिः शस्त्रो भद्रात्मजश्च सः ॥"

इति त्रिकाण्डशेषः ॥

शस्त्रकं, क्ली, (शस्त्रमेव । स्वार्थे कन् ।) लौहम् । इत्यमरः ॥

शस्त्रकोशतरुः, पुं, (शस्त्रस्य खड्गस्य कोश इव तरुः ।) महापिण्डीतरुः । इति राजनिर्घण्टः ॥

शस्त्रजीवी, [न्] (शस्त्रेण जीवतीति । जीव + णिनिः ।) शस्त्राजीवः । इति हेमचन्द्रः ॥ (यथा, वृहत्संहितायाम् । १७ । २४ ।

"रविजेन सिते विजिते
गणमुख्याः शस्त्रजीविनः क्षत्रम् ॥")

शस्त्रधारणजीवकः, त्रि, (शस्त्रधारणेन जीवतीति । जीव + ण्वुल् ।) शस्त्राजीवः । इति शब्दरत्नावली ॥

शस्त्रपाणिः, त्रि, (शस्त्रं पाणौ यस्य ।) शस्त्रहस्तः । यथा,—

"उल्काहस्तोऽग्निदो ज्ञेयः शस्त्रपाणिश्च घातकः ।
केशाकेशिगृहीतश्च युगपत् पारदारिकः ॥"

इति व्यवहारतत्त्वम् ॥

अपि च ।

"अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।
क्षेत्रदारापहारी च षड़ेते आततायिनः ॥"

इति प्रायश्चित्तविवेकः ॥

शस्त्रभृत्, त्रि, शस्त्रधारी । शस्त्रं बिभर्त्तीति । भृधातोः क्विप्प्रत्ययेन निष्पन्नमेतत् ॥ (यथा, रघुः । २ । ४० ।

"शस्त्रेण रक्ष्यं यदशक्यरक्षं
न तद्यशः शस्त्रभृतां क्षिणोति ॥")

शस्त्रमार्जः, पुं, (शस्त्राणि मार्ष्टीति । मृज + अण् ।) शस्त्रमार्जनकर्त्ता । सिकल्गर इति भाषा । तत्पर्य्यायः । असिधावकः २ । इत्यमरः ॥ शस्त्रमार्जः ३ असिधावः ४ । इति शब्दरत्नावली ॥ शानाजीवः ५ भ्रमासक्तः ६ । इति हेमचन्द्रः ॥

शस्त्रहतः, त्रि, (शस्त्रेण हतः ।) शस्त्राघातेन मृतः । तस्याशौचादि यथा । व्याघ्रः ।

"क्षतेन म्रियते यस्तु तस्याशौचं भवेद्विधा ।
आसप्ताहात् त्रिरात्रं स्यात् दशरात्रमतः परम् ॥
शस्त्राघाते त्र्यहादूर्द्ध्वं यदि कश्चित् प्रमीयते ।
अशौचं प्राकृतं तत्र सर्ववर्णेषु नित्यशः ॥"

अत्र शस्त्रघातपदं क्षतेतरशस्त्रघातपरं पारिभाषिकशस्त्रघातपरमपि । यथा, देवीपुराणे ।

"पक्षिमत्स्यमृगैर्ये तु दंष्ट्रिशृङ्गिनखैर्हताः ।
पतनानशनप्रायैर्वज्राग्निविषबन्धनैः ।
मृता जलप्रवेशेन ते वै शस्त्रहताः स्मृताः ॥"

अन्यथा क्षतं विना पतनादिभिर्बलिम्बहतानां दिनग्रहणे अनध्यवसायः स्यात् । न च शास्त्रीयव्यवहारेऽन्तरङ्गत्वेन पारिभाषिकस्यैव युक्तत्वमिति वाच्यं श्राद्धे पारिभाषिकापारिभाषिक-